# अभ्यास हेतु सेंपल प्रश्न पत्र
# माध्यमिक शिक्षा मण्डल, म.प्र., भोपाल
# हाईस्कूल परीक्षा 2022–23
# विषय –संस्कृत

समय – 3 घण्टा पूर्णांकः 75

---

निर्देश : –

(i) सर्वे प्रश्नाः अनिवार्याः !

(ii) प्रश्नानां सम्मुखे अंकाः प्रदत्ताः !

1. उचितं विकल्पं चित्वा लिखत – 6

(क) 'मम' पदे विभक्तिः अस्ति –

(i) द्वितीया (ii) तृतीया
(iii) पञ्चमी (iv) षष्ठी

(ख) ''रमा'' शब्दस्य चतुर्थी विभक्तेः एकवचने शब्दरूपं भवति–

(i) रमाम् (ii) रमया
(iii) रमायै (iv) रमायाः

(ग) ''राज्ञा'' पदे विभक्तिः अस्ति –

(i) द्वितीया (ii) तृतीया
(iii) प्रथमा (iv) चतुर्थी

(घ) 'फलम्' पदे विभक्तिः अस्ति –

(i) प्रथमा (ii) तृतीया
(iii) सप्तमी (iv) चतुर्थी

(ङ) अधोलिखितेषु अव्ययम् अस्ति –

(i) पुत्र (ii) सूत्र
(iii) कुत्र (iv) पत्र

(च) अधोलिखितेषु अव्ययं न अस्ति –

(i) कदा (ii) सदा
(iii) तदा (iv) अजा

2. रिक्तस्थानानि पूरयत् – 6.

(क) 'अवदत्' पदे .................... धातुः अस्ति। (वद्/दतं)
(ख) 'गच्छामि' पदे .................... पुरूषः अस्ति। (प्रथम पुरूषः/उत्तम पुरूषः)
(ग) 'पचन्तु' पदे .................... वचनम् अस्ति। (एकवचन/बहुवचन)
(घ) 'पिबेत्' पदे .................... लकारः अस्ति (विधिलिङ्/लोट्)
(ङ) 'पराजयः' पदे ....................... उपसर्गः अस्ति (पर/परा)
(च) 'अधिकारः' पदे ................................उपसर्गः अस्ति। (अधि/अधिक)

3. युग्ममेलनं कुरूत – 6.

| | (क) | (ख) |
|---|---|---|
| (क) | सज्जनः | परोपकार |
| (ख) | सः+अपि | व्यञ्जन् सन्धिः |
| (ग) | गुणसन्धिः | विसर्गसन्धिः |
| (घ) | घनश्यामः | कार्यकुशलः |
| (ङ) | पीताम्बरः | कर्मधारयः समासः |
| (च) | तत्पुरुष समासः | बहुब्रीहिः समासः |

4. अधोलिखित प्रश्नानाम् उत्तराणि एकपदेन/एकवाक्येन वा लिखत – 6.

(क) 'ल्यप्' प्रत्ययस्य एकम् उदाहरणं लिखत?
(ख) 'धनवानः' पदे कः प्रत्ययः अस्ति?
(ग) 'वद्+तुमुन्' इत्यस्य पदं कि भविष्यति?
(घ) प्राणेभ्योऽपि कः रक्षणीयः?
(ङ) कस्य शोभा एकेन राजहंसेन भवति?
(च) बुद्धिमती कुत्र व्याघ्रं ददर्श ?

5. शुद्धवाक्यानां समक्षं ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत – 6.

(क) 'पत्नी' शब्दस्य पर्यायः 'भार्या' भवति ।
(ख) 'अधुना' पदस्य पर्यायः 'अत्र' भवति।
(ग) 'सूर्योदयः' पदस्य विलोमः 'दिवसः' अस्ति।
(घ) 'शिवः' पदस्य विलोमः 'अशिवः' अस्ति।
(ङ) दुर्बलं वृषभम्' इत्यत्र 'दुर्बलं' विशेषणपदम् अस्ति।
(च) 'क्रुद्धकृषकः' इत्यत्र 'क्रुद्धः' विशेष्यपदम् अस्ति।

6. कविः कुत्र सञ्चरणं कर्त्तुम् इच्छति? 2.

अथवा

मयूरः कथं नृत्यमुद्रायां स्थितः भवति?

7. बुद्धिमती केन उपेता पितुगृहं प्रति चलिता? 2.

अथवा

कस्य शोभा एकेन राजहंसेन भवति?

8. कुशलवयोः वंशस्य कर्ता कः? 2.

अथवा

पृथिव्याः स्खलनात् किं जायते?

9. मातुः अधिका कृपा कस्मिन् भवति? 2.

अथवा

केन समः बन्धुः नास्ति?

10. जननी कीदृशी भवति? 2.

अथवा

जनः किमर्थं पदातिः गच्छति

11. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत– (केचित् द्वे) 2.

(क) सर्वे प्रकृतिमातरं प्रणमन्ति ।

(ख) त्वं मानुषात् विभेषि।

(ग) मयूरस्य नृत्यं प्रकृतेः आराधना ।

12. अधोलिखितानि वाक्यानि कः कं प्रति कथयति– (केचित् द्वे) 2.

(i) भवान् कुत्रः भयात् पलायितः।

(ii) पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।

(iii) वयस्य! अपूर्वं खलु नामधेयम्।

13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत। 2.

14. अधोलिखितानाम् अशुद्धकारक वाक्यानां शुद्धिः करणीयाः। (केचित् द्वे) 2.

(i) श्रीरामं नमः
(ii) वृक्षेण पत्रं पतति।
(iii) पिता पुत्रस्य सह गच्छति।
(iv) छात्राः कन्दुकेन क्रीडति।

15. प्रदत्तैः शब्दैः रिक्त स्थानपूर्तिं कुरुत– (केऽपिचत्वारः) 2.

(अत्र, सदा, विद्यया अहिभुक्, पादध्वनिना)

(क) ..........समयस्य सदुपयोगः करणीयः।
(ख) मयूरः.............इति नाम्ना अपि ज्ञायते।
(ग) चौरस्य................प्रबुद्धः अतिथिः।
(घ) .............जीवनं दुर्वहम् अस्ति ।
(ङ.) .................बिना जीवनं नास्ति।

16. अधोलिखितानि वाक्यानिकथाक्रमानुसारेण योजयत्। 2.

(i) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत् ।
(ii) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।
(iii) लोकानां पश्यताम् एव सर्वत्र जलोपप्लवः सञ्जातः।
(iv) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।

17. निर्देशानुसारं वाच्य परिवर्तनं कुरुत–(केऽपि द्वे) 2.

(i) अहं पुस्तकं पठामि। (कर्मवाच्ये परिवर्तनं कुरुत)
(ii) रामेण बालकाः दृश्यन्ते। (कर्तृवाच्ये परिवर्तनं कुरुत)
(iii) सः ग्रामं गच्छति। (कर्मवाच्ये परिवर्तनं कुरुत)

18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत। 3.

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपाजिर्तवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रूग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः।

(i) निर्धनः जनः कथं वित्तं उपार्जितवान्?
(ii) तत्तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत्?
(iii) पिता कस्य रुग्णतामाकर्ण्य व्याकुलो जातः?

अथवा

अस्ति देउलाख्यो ग्रामः तत्र राजसिंहः नाम राजपुत्रः वसतिस्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद–''कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्।''

(i) राजपुत्रस्य नाम किम् ?
(ii) बुद्धिमती कुत्र व्याघ्रं ददर्श?
(iii) बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता?

19. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – 3.

एक एव खगोमानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

(i) कः पिपासितः म्रियते?
(ii) चातकः किमर्थं मानी कथ्यते?
(iii) श्लोके समागतान् अव्ययपदान् लिखत?

**अथवा**

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति, योजकस्तत्र दुर्लभः।।

(i) अमन्त्रं किं नास्ति?
(ii) अनौषधं किं नास्ति?
(iii) अयोग्यः कः नास्ति?

20. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत। 3.

विदूषकः– (जनान्तिकम्) अहं पुनः पृच्छामि (प्रकाशम्) किं नामधेया युवयोर्जननी?

लवः– तस्याः द्वे नाम्नी।

विदूषकः– कथमिव?

लवः– तपोवन वासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूः इति।

रामः– अपि च इतस्तावद् वयस्य।

(i) तपोवनवासिनः लव कुशयोःमातरं केन नाम्ना आह्वयन्ति?
(ii) विदूषकः लवकुशयोः किं पृच्छति?
(iii) कुशलवयोः मातरं वाल्मीकिः केन नाम्ना आह्वयति?

अथवा

व्याघ्रचित्रकौः– अरे किं वनराजपदाय सुपात्रं चीयते? एतदर्थं तु आवामेव योग्यौ यस्य कस्याचयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः– तूष्णीं भवभोः युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्य जीवाः भक्षकं रक्षक पदयोग्यं न मन्यन्ते अत एव विचारविमर्शः प्रचलति।

बकः– सर्वथा सम्यगुक्तम् सिंहमहोदयेन। वस्तुतः एवं सिंहेन बहुकालपर्यन्तं शासनं कृतं परमधुना तु कोऽपि पक्षी एवं राजेति निश्चेतव्यम्

(i) सिंहानुसारेण कौ भक्षकौ?
(ii) केन सम्यक् उक्तम् ?
(iii) बकानुसारेण कः राजा निश्चेतव्यम्?

21. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा चतुराणां प्रश्नानाम् उत्तराणि संस्कृते लिखत– 4.

शरीरं धर्मस्य प्रथमं साधनम अस्ति–शरीर माघं खलु धर्मसाधनम्। शरीरस्य अरोग्यं व्यायामेन सिध्यति। यः व्यायामः करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्त सञ्चारः भवति। इन्द्रियाणि सुस्थानि स्वस्थानिच भवन्ति। जठराग्निः दीप्तःभवति। परिवृद्धम् उदरं सङ्कोचं गच्छति। मस्तिष्कम् उर्वरं भवति। अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः।

(i) धर्मस्य प्रथमं साधनं किम्?
(ii) शरीरस्य आरोग्यं केन सिद्ध्यति?
(iii) केन शुद्धरक्तसञ्चारः भवति?
(iv) व्यायामेन कीदृशम् उदरं सङ्कोचं गच्छति?
(v) जनैः वयोऽनुसारं किम् अवश्यं करणीयः?

22. स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। 4.

अथवा

स्वमित्राय एकं शुभकामनापत्रं संस्कृतभाषायां लिखत।

23. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत – 4.

(i) संस्कृतभाषायाः महत्त्वम्
(ii) महाकविः कालिदासः
(iii) अस्माकं देशः
(iv) उत्सवः (दीपावलिः)

xxx